## द्वादशः पाठः

# चित्रकूटम्

मध्यप्रदेशस्य सतनामण्डले विन्ध्यपर्वतमालायाः मध्ये नैसर्गिकेऽतिरमणीये विस्तृते क्षेत्रे तीर्थस्थलं चित्रकूटं स्थितम् अस्ति। इदं स्थलं नगरकोलाहलरहितं प्राकृतिकसौन्दर्यसम्पन्नम् अस्ति। अत्र आगमनेन दर्शनेन च सहजतया आनन्दानुभूतिः जायते। चित्रकूटे सघनानि वनानि सन्ति, अत्र कल-कलनादपूरिताः निर्झराः अपि वर्तन्ते। सर्वत्र हरीतिमा राजते। चित्रकूटस्य धार्मिकं, सांस्कृतिकं, नैसर्गिकम् अपि महत्त्वं विद्यते। कथ्यते यत्- भगवान् रामचन्द्रः वनवासकाले सीतालक्ष्मणाभ्यां सह एकादशवर्षाणि यावत् चित्रकूटे एव निवासं कृतवान्। महर्षिः अत्रिः, साध्वी अनुसूया च अत्रैव तपस्यां कृत्वा आत्मज्ञानम् अलभेताम्। जनश्रुत्यनुसारम् अत्रैव अनुसूया ब्रह्मा-विष्णु-महेशानां स्वतपसा बालरूपेण साक्षात्कारं कृतवती। अत्र अनेकानि दर्शनीयानि स्थलानि सन्ति। यथा—

**रामघट्टः—** मन्दाकिन्याः तटे रामघट्टः अस्ति। अयम् अतीवरमणीयः घट्टः। अत्र साधूनां महात्मनां तीर्थयात्रिणां च प्रायः सम्मर्दः भवति। सूर्योदयात् सूर्यास्तं यावत् मन्त्रोच्चारणेन वातावरणं गुञ्जायितं भवति। सन्ध्याकाले नीराजनसमये मनोरमदृश्यं भवति। अत्र नौकाविहारस्य आनन्दः अपि यात्रिभिः लभ्यते।



**कामदगिरिः—** कामदगिरिस्थलस्य धार्मिकं महत्त्वं लोकप्रसिद्धम्। एतत् स्थलं हरीतिमाच्छादितम् अस्ति। अत्र श्रद्धालवः भगवतः रामस्य प्रतीकस्वरूपं चरणचिह्नं पूजयन्ति। मान्यता अस्ति यद् भरतः अयोध्यावासिभिः सह रामं पुनः अयोध्याम् आनेतुम् अत्रैव प्रार्थितवान्। अत्रैव समीपे भरतमिलापमन्दिरम् अस्ति। कामदगिरेः प्रदक्षिणा जनैः क्रियते।

**जानकीकुण्डम् —** रामघट्टात् नातिदूरम् एव जानकीकुण्डम् अस्ति। तत्र नौकया अपि गन्तुं शक्यते। अत्र मन्दाकिन्याः शान्तं जलम् अतीतस्मृतिपूरितम् इव स्थिरं भाति। वनवासे सीता अत्रैव स्नानं करोति स्म। अत एव एतस्य नाम जानकीकुण्डम् इति प्रसिद्धम्।

**अनुसूयाश्रमः —** सघनवनमध्ये अनुसूयाश्रमः विद्यते। अत्र पक्षिणां कलरवः, निर्झरझर्झरध्वनिः शीतलवायुः च मनांसि रञ्जयन्ति। मन्दाकिन्याः उद्गमस्थलम् एतदेव। अत्र ब्रह्म-विष्णु-महेशात्रि-अनुसूयादयः तपस्याम् अकुर्वन्।

**स्फटिकशिला —** जानकीकुण्डसमीपे एव विशाला शिला दर्शनीया वर्तते। अत्रैव जयन्तः काकरूपेण सीताचरणे चञ्चुप्रहारं कृतवान् आसीत् इति प्रसिद्धम्।

**गुप्तगोदावरी —** चित्रकूटतः पञ्चक्रोशदूरं नयनाभिरामं सौन्दर्ययुक्तं गुप्तगोदावरीस्थलं वर्तते। अत्र द्वे नैसर्गिके गुहे स्तः। अत्र निरन्तरं जलं प्रवहति।

**हनुमान्धारा —** अत्र उच्चस्थलात् जलं पतति। जलप्रपातः अत्र खलु द्रष्टव्यः एव। लङ्कादहनानन्तरं रामाज्ञया हनुमान् अत्रैव शीतलत्वं प्राप्तवान् अतः एतस्य नाम हनुमान्धारा इति जनश्रुतिः।

**ग्रामोदयविश्वविद्यालयः —** अत्र राष्ट्रसेवकेन नानाजीदेशमुखेन ग्रामोद्धारभावनया नवीनः प्रकल्पः स्थापितः। चित्रकूटग्रामोदयविश्वविद्यालयः, साम्प्रतं सः महात्मागान्धिग्रामोदयविश्वविद्यालयः इति नाम्ना प्रसिद्धः। अत्र प्राकृतिकचिकित्साप्रकल्पः अपि वर्तते। कृषेः अनुसन्धानकार्येषु अत्र महती प्रगतिः दृश्यते।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मण्डले | — जिले में | अतीतस्मृतिपूरितम् | — प्राचीन स्मृतियों (यादों) से भरा |
| नैसर्गिके | — प्राकृतिक रूप में | जयन्तः | — इन्द्र का पुत्र (काक रूपधारी) |
| सहजतया | — स्वाभाविक रूप से | | |
| कल-कलनादपूरिताः | — कल-कल स्वर से भरपूर | चञ्चुप्रहारम् | — चोंच से प्रहार |
| | | गुहे | — दो गुफाएँ |
| सम्मर्दः | — भीड़ (समूह) | | |
| गुञ्जायितम् | — गुञ्जित हुआ | नयनाभिरामं | आँखों को अच्छा लगने वाला |
| नीराजनसमये | — आरती के समय | प्रकल्पः | विचार |
| यात्रिभिः | — यात्रियों के द्वारा | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत —**

क. चित्रकूटं कस्मिन् मण्डले अस्ति?

ख. चित्रकूटे सर्वत्र किं राजते?

ग. रामघट्टः कस्याः तटे वर्तते?

घ. चित्रकूटे जलप्रपातस्य किं नाम?

ङ. जयन्तः सीताचरणे किं कृतवान्?

2. **एकवाक्येन उत्तरं लिखत —**

क. चित्रकूटं कीदृशं स्थलम् अस्ति?

ख. निर्झराः कीदृशाः वर्तन्ते?

ग. हनुमान्धारा इति नाम कथं प्रसिद्धम्?

घ. चित्रकूटे कः विश्वविद्यालयः अस्ति।

3. **रिक्तस्थानं पूरयत —**

क. चित्रकूटं ...................... मध्ये स्थितम्।

ख. रामचन्द्रः ..................... यावत् निवासं कृतवान्।

ग. चित्रकूटे द्वे ........................ स्तः।

घ. सघनवनमध्ये .................... विद्यते।

ङ. चित्रकूटे ..................... नदी प्रसिद्धा।

4. **उचितपदेन योजयत —**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | चित्रकूटम् | - | ग्रामोदयविश्वविद्यालयः |
| ख. | जलप्रपातः | - | सतनामण्डले |
| ग. | नानाजीदेशमुखः | - | महर्षिः अत्रिः |
| घ. | आत्मज्ञानम् | - | हनुमान्धारा |

5. **कोष्ठकात् शब्दान् चित्वा प्रश्ननिर्माणं कुरुत—**

(कस्मिन्, कस्याः, कीदृशानि, कस्मात्, के)

क. चित्रकूटं <u>सतना</u> मण्डले अस्ति।

ख. रामघट्टः <u>मन्दाकिन्याः</u> तटे अस्ति।

ग. चित्रकूटे <u>सघनानि</u> वनानि सन्ति।

घ. <u>रामघट्टात्</u> नातिदूरं जानकीकुण्डम्।

ङ. चित्रकूटे <u>द्वे</u> नैसर्गिके गुहे स्तः।

6. शब्दं/धातुं प्रत्ययं च लिखत—

| | | शब्दः/धातुः | प्रत्ययः |
|---|---|---|---|
| क. | गन्तुम् | | |
| ख. | कृतवान् | | |
| ग. | आनेतुम् | | |
| घ. | चित्रकूटतः | | |
| ङ. | दर्शनीया | | |

7. विभक्तिं लिङ्गं वचनं च लिखत—

| | | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|
| क. | मण्डले | | | |
| ख. | यात्रिकैः | | | |
| ग. | मालायाः | | | |
| घ. | कामदगिरेः | | | |
| ङ. | तपस्याम् | | | |

**योग्यताविस्तारः —**

- चित्रकूटस्थस्थलानां चित्राणि सङ्कलनीयानि।
- अन्यं दर्शनीयस्थलं ज्ञातव्यम्।

*चित्रकूटस्य कूटोऽयं दृश्यते सर्वतः शुभः।*